# न्यायलीलावती

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासंगताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अतएव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्थाः भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठायां प्राप्नुवन् ये च ग्रन्थाः अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्थाः अचिरादेव विद्वत्समाजस्य स्वाध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **न्यायलीलावती** इति नामकः वैशेषिक शास्त्रीयः संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ् मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**–राधावल्लभः त्रिपाठी**

| विषयः । | पृ० | पं० |
|---|---|---|
| सूर्यपरिस्पन्दस्य क्षणावच्छेदकोपाधित्वप्रदर्शकं मतान्तरम् । | ३९ | ३ |
| विभागाभावादिरूपोपाधिचतुष्कान्यतमस्य क्षणोपाधित्वमिति मतान्तरप्रदर्शनम् । | ,, | ४ |
| तत्र किरणावलीकारसम्मतिः । | ,, | ६ |
| उक्तमतद्वयखण्डनम् । | ४० | १ |
| सूर्यसंयोगविभागयोः क्षणोपाधित्वमिति मतान्तरवर्णनम् । | ४१ | २ |
| तत्खण्डनम् । | ,, | ३ |
| सिद्धान्तिमतेन क्षणखण्डनम् । | ४२ | १ |
| क्षणिकत्वपरिष्कारस्तत्र विवृतौ रु०मिश्रमतखण्डनम् । टी० | ४३ | १३ |
| क्षणसाधकप्रत्यक्षानुमानयोः खण्डनम् । | ४३ | १ |
| स्वमतेन क्षणव्यपदेशबीजतद्विषयोपाधिवर्णनम् | ४५ | ३ |
| विजातीयज्ञानस्य सार्वलौकिकक्षणव्यवहारहेतुत्वम् । टी० | ४६ | २५ |
| सूर्यस्पन्दे क्षणव्यवहारस्यौपचारिकत्वकथनम् । टी० | ४९ | १४ |
| क्षणज्ञानस्य विशिष्टव्यवहारसमर्पकत्वम् । | ५० | १ |
| विवृतौ परिष्कृतक्षणलक्षणम् । टी० | ५३ | २१ |
| शक्तेः पदार्थान्तरत्वनिरासः । | ५४ | १ |
| शक्तिसाधकानुमानं तत्खण्डनं च । | ५८ | २ |
| शक्तिबाधकानुमानवर्णनम् । | ६२ | १ |
| विवृतौ मुरारिमिश्रमतानुसारिणो वल्लभस्य मण्यादिप्रयोगजन्यमदृष्टं प्रतिबन्धकमिति मतस्य खण्डनम् । टी० | ,, | १३ |
| दाहं प्रति प्रतिबन्धकाभावस्य कारणत्वे पूर्वपक्षस्तत्समाधानं च । | ६४ | ३ |
| ज्ञाततायाः पदार्थान्तरत्वनिरासः । | ६८ | १ |
| वैशिष्ट्यस्यातिरिक्तपदार्थान्तरत्वखण्डनम् । | ६७ | १ |
| वैशिष्ट्यस्य ज्ञानरूपत्वव्यवस्थापनम् । | ७१ | १ |
| वैशिष्ट्यस्यातिरिक्तत्वे ध्वंसनाशापत्तिरिति मिश्रमतखण्डनम् । वि० | ७२ | २० |
| नव्याभिमतस्वाभावाधिकरणताप्रयोजनस्य निरासः । वि० | ७३ | २९ |
| गुरुत्वप्रतिबन्धकत्वादिरूपत्वमेव निर्वाह्यताख्यत्वस्य पदार्थान्तरत्वमिति व्यवस्थापनम् । | ,, | १ |

पदार्थान्तरे भावत्वं नास्तीत्यन्ययोगव्यवच्छेदस्य वा विभागार्थत्वात् ।

अभावस्य च समानतन्त्रसिद्धस्याप्रतिषिद्धस्य न्यायदर्शने

---

न्यायलीलावतीकण्ठाभरणम्

त्वं च समभिव्याहारबलप्रतीयमानमादायेति विवक्षितत्वात् । पदार्थान्तर इति । षड्लक्षणवदेव भावजातीयं नान्यादित्यन्ययोगव्यवच्छेदोऽपि सम्भवतीत्यर्थः । ननु भावजातीयत्वेन षण्णामेवाभिधाने सिद्धसाधनमन्यथा चाप्रसिद्धिरेवेति चेन्न गुणवदेव द्रव्यमित्याद्ययोगव्यवच्छेदस्यापि एवमप्यनुपपन्नत्वप्रसङ्गात् । द्रव्यत्वनियतसामानाधिकरण्यबोधनमेवायोगव्यवच्छेद इति चेत् तुल्यं प्रकृतेऽपि । इदमत्राकूतम्—पदार्थो द्विविधो भावोऽभावश्च । षोढा द्रव्यादिरिति विभक्तविभागे भावत्वं षड्लक्षणवत्त्वानधिकरणानधिकरणत्वम् । भावत्वं च सत्तासम्बन्धित्वं सत्तासंम्बन्धश्च समवायेन त्रयाणामेकार्थसमवायेन सामान्यविशेषयोः स्वरूपसम्बन्धेन सत्तासमवाययोरविशिष्टः । ननु विभक्तविभागश्चेदयं तदाऽभावविभागो न श्रूयते इति तं समर्थयति—अभावस्येति । 'तेषु न लक्षितलक्षणात्वा' वित्यादिसूत्रे न्यायदर्शने समानतन्त्रेऽभावस्य व्युत्पादितत्वादत्र च तदप्रतिषेधात् परमतमप्रतिषिद्धमनुमतमितिन्यायेन सूत्रकृतस्तत्राभ्युपगमोन्नयनात् । न्यायेति । यथा गोतमेन मनस इन्द्रियत्वं नोक्तमप्रतिषेधादभ्युगतं चेत्यर्थः । तर्हि अप्रतिषेधादन्यत्राभ्युपगमोऽस्तु किं पदार्थान्तरव्युत्पादनेनेति न शङ्कनीयम्, द्रव्यादिपदार्थानामुद्देशलक्षणपरीक्षारूपं शाब्द(स्त्र?)मेवेदं पृथक् न स्यात्, तथा च तत्त्वज्ञानार्थताभङ्गो निःश्रेयसहेतुताप्यस्य

न्यायलीलावतीप्रकाशः

प्रमेयत्वसमानाधिकरणात्यन्ताभावप्रतियोगि न वाच्यत्वमित्यर्थः । वाच्यत्वायोगस्याप्रसिद्धेः । पदार्थान्तरे अभाव इत्यर्थः । ननु चाभावस्य सूत्रकारेणाविभजनादप्रामाणिकत्वमेव तस्यानुमीयते (१)तत्कथं तत्रायोगप्रसिद्धिरित्यत आह—अभावस्य चेति । न त्वेवं द्रव्यादीनामप्यनभिधानं प्राप्तम्, तेषामपि समानतन्त्रेऽभिधानादित्यत आह—

---

(१) तदनुमतामित्युन्नीयते इति पाठान्तरम् ।